International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(4): 229-232
© 2022 IJSR
www.anantaajournal.com
Received: 19-05-2022
Accepted: 23-06-2022

**सत्येश्वर जाना**
शोधछात्रः- श्री लाल वहादुर शास्त्री राष्ट्रीय संस्कृत विश्व विद्यालय, नई दिल्ली, भारत

**Corresponding Author:**
**सत्येश्वर जाना**
शोधछात्रः- श्री लाल वहादुर शास्त्री राष्ट्रीय संस्कृत विश्व विद्यालय, नई दिल्ली, भारत

# अद्वैतवेदान्तस्याधुनिके समाजे उपयोगिता

**सत्येश्वर जाना**

## प्रस्तावना

वेदानामन्ते भवः वेदान्त इति व्युत्पत्त्या वेदान्तो नाम उपनिषत्प्रमाणमिति वेदान्तसारवचनाद्वा उपनिषत्शब्दवाच्यः वेदान्त इत्यवगम्यते। यत्र वेदान्तेषु श्रुत्यानुकूल्येन जीवब्रह्मणोरैक्यात्मकं सिद्धान्तं प्रतिपाद्यते तत्रैव तदात्मके सिद्धान्ते अद्वैतवेदान्तस्य प्रयोगः समुपलभ्यते। 'सदेव सोम्येदमग्र आसीत्', 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि' इत्यादिश्रुतिभिः आत्मैकत्वमुपपद्यते। इदमेवात्मैकत्वं विज्ञानं मोक्षः अद्वैतवेदान्तप्रतिपादितः मोक्षः चतुर्षु पुरुषार्थेषु नित्यत्वादन्यतमत्वाद्वा परमपुरुषार्थत्वेनाभिधीयते। मोक्षोऽयमवश्यं जीवब्रह्मैक्यज्ञानसाध्यः। 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' 'आत्मा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' 'भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' इत्यादिभ्यः शतशः श्रुतिस्मृतिभ्यः आत्माद्वैतज्ञानमात्रसाध्यः मोक्षः अभ्युपगम्यते। जीवन्मुक्तस्य लक्षणं वेदान्तसारग्रन्थे श्रीसदानन्दयतिना लिखितम् – 'जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृतऽज्ञानतत्कार्यसञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठ'। तत्र विधिनिषेधशास्त्रबन्धरहितस्य मुक्तपुरुषस्य यथेष्टाचरणस्यापत्तिर्न भवति यतो हि साधकावस्थायामेव अशुभाचरणानां निवर्तितत्वाच्छुभाचरणानामेवानुवृत्तिर्भवतीति शुभाशुभाचरणयोरौदासीन्यं वा भवति। शुभाशुभयोरौदासीन्ये बृहदारण्यकश्रुतिरेव प्रमाणम् 'अमौनं मौनं च निर्विद्याथ ब्राह्मण' इति।

सर्वेषां पुरुषार्थानां व्यक्तिनिष्ठत्वात् मोक्षस्यापि वैयक्तिकतां सिध्यति तर्हि व्यक्तिमात्रनिष्ठस्य मोक्षस्य प्रमाणभूताद्वैतवेदान्तस्य सामाजिकोपयोगित्वं नास्तीति चेन्न, तत्र अद्वैतवेदान्तप्रतिपादितस्य मोक्षस्य व्यक्तिमात्रनिष्ठत्वेऽपि एकव्यक्तिमात्रनिष्ठत्वं नास्ति। समाजः जनानां समूह अतस्सर्वे सामाजिकाः अद्वैतज्ञानेन मोक्षः प्राप्तुं शक्नुवन्ति।

लोकेऽस्मिन् जनाः सुखदुःखमयं जीवनं यापयन्तः स्वस्वकर्मानुसारं फलमाप्नुवन्ति। परञ्चान्ततः सर्वेषामियमेवेच्छा जायते यद् येन केन प्रकारेण सुखस्य प्राप्तिर्भवेत् दुःखस्य च निवृत्तिर्भवेदिति। प्रायः सर्वे जनाः संसारेऽस्मिन् सुखस्य शाश्वतसाधनमन्वेषमाणा नानाविधानुष्ठानयज्ञयागादिभिः साधनैः सुखस्याभीष्टफलं प्राप्नुवन्ति।

प्राप्तेऽप्यमुत्रपुण्यचिते लोके अन्ततः क्षीणे पुण्ये मर्त्यलोकं विशन्ति । एतेन संसारचक्रं तस्य जीवनं न त्यजति । दिव्यभोगान् भुक्त्वाऽपि पुण्यलोके आत्यन्तिकं सुखं न प्राप्नुवन्ति । पौनःपुन्येन गमनागमनं भौतिके जगति सततं प्रचलति । 'तद्यथेह कर्मचितो लोकः क्षीयते तथैवामुत्रपुण्यचितो लोक क्षीयत एव' इति श्रुत्या कर्मचितलोकस्य पुण्यचितलोकस्य चानित्यत्वं स्पष्टतया प्रकटितम् । यथोक्तं गीतायामपि -

> ते तं भुक्त्वां स्वर्गलोकं विज्ञातं
> क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
> एवं त्रयी धर्ममनुप्रपन्ना
> गतागतं कामकामा लभन्ते ॥

कर्मणां भोगः तत्तदिन्द्रियैः कर्मेन्द्रियैर्ज्ञानेन्द्रियैश्च जायते । केचिच्च चपलजिह्वेन्द्रियवशीभूताः भौतिकपदार्थान् भुञ्जन्ति । तेन भोगेन रोगाणामुत्पत्तिर्जायते । रोगाक्रान्ता जना दुःखवेदनामनुभवन्ति । अन्ततस्तस्मान्निवृत्तिं वाञ्छन्ति । इत्थं सर्वे सर्वेन्द्रियवशीभूताः सन्तः सुखमभिलसन्त दुःखस्य निवृत्तिं काक्षन्ति । परञ्च सुखाभिमुखिनो जना तत्पृष्टे दुःखं नावलोकयन्ति ।

एवं प्रकारेण जगति नानादुःखेभ्यो संतप्तमानवमनसि तेभ्यः निवृत्तिर्विषयिकाकांक्षा यदा जागर्ति तदा जिज्ञासयोद्भूतविचारसम्पन्नो जनोऽयं शाश्वतं सुखं प्राप्तुं प्रयतते । लौकिकं पारलौकिकञ्च सुखं शाश्वतं सुखं नास्तीति निश्चित्य सम्भाव्याध्यात्मिकसुखं प्रति जनोऽभिलषितोऽभवत् । मानवः स्वमनसि सम्यगनुभूतवान् यदाध्यात्मिकसुखमेव वास्तविकं शाश्वतं सुखमिति तेनैव शान्तिनिवृत्ता भवेदिति । तत्र संशयो जायते यदाध्यात्मिकसुखस्य प्राप्तिः वेदान्तेतरदर्शनशास्त्रेण प्राप्यते आहोस्विद् वेदान्तशास्त्रेण च । यद्यपि सर्वेषां दार्शनिकानां मोक्ष एव निश्चितं लक्ष्यं दृश्यते । सर्वे दार्शनिकविचाराः सर्वाणि दार्शनिकतत्त्वानि लोकोपकारकाणि शाश्वतसुखदायकानि च सन्ति । तथापि सकलोपनिषत्प्रमाणेन प्रमाणितस्य द्वैतमिथ्यात्वपूर्वकमद्वैतज्ञानस्वरूपात्मकस्य मोक्षस्यानुकूलसिद्धान्तप्रतिपादकः आचार्यशङ्करेण प्रवर्तितः अद्वैतवेदान्तसिद्धान्त एव ग्राह्यः ।

जन्मान्तरे वा ननु अधिकारीपुरुषाणामेव मोक्षाय प्रवृत्तिः दृश्यते । अद्वैतवेदान्ताधिकारी विषये वेदान्तसारे उक्तम् - 'अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिञ्जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुररं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमातेति' । अनेन ज्ञायते यत् कृतान्तःकरणशुद्धानां प्राप्तसाधनचतुष्टयानां मुमुक्षूणामेव अद्वैतवेदान्ताभिमतमोक्षे अधिकारः । तस्मात् येषामधिकारसम्पन्नानां परमपुरुषार्थाय मोक्षाय प्रवृत्तिः तेषां कृते अद्वैतवेदान्तस्योपयोगः । किन्तु अन्येषामनधिकृतानां कृते अद्वैतवेदान्तस्य कथमुपयोगः । आधुनिके समाजे पूर्वोक्तानामधिकारीणां अत्यल्पत्वेनोपस्थितिः दृश्यते । अद्यतने समाजे दृश्यमानानां सामान्यजनानां तादृशाधिकारसम्पन्नतामसम्भवात् तेषां मोक्षाय प्रवृत्तिः न भविष्यति । श्रीमद्भगवद्गीतायां श्रीकृष्णेनाधिकारिणं विरलतां प्रदर्शयन्नुक्तम् –

> आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद् वदति तथैव चान्यः ।
> आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥

तत्रैव शंकरानन्दीव्याख्यायां स्पष्टतयोक्तम् यत्- 'मनुष्येषु शतकोटिसंख्याकेषु यः कश्चिन्मत्प्रसादपात्रीभूत एवं कूटस्थासङ्गचिद्रूपमात्मानमद्वयमखण्डानन्दैकरसं पश्यति साक्षात्कर्तुमिच्छति स आश्चर्यवदेव भवति । लोकैः कर्तुमशक्यस्य कर्मणः करणमाश्चर्यं तत्करणार्ह एव भवति । यथा हनुमतः समुद्रलङ्घनं तद्वदत्र सर्व विषयापाशापा निर्दा मोक्षेच्छाकरणमाश्चर्य, मोक्षेच्छाया अतिदुर्लभत्वाद्बहुजन्मलभ्यत्वाद्बहुपुण्यपरिपाकसाध्यत्वाच्चित्तप्रसादैकमुलत्वाच्च संतीर्णाशेषविषयाशासिन्धुः शुद्धात्मा मोक्षैककामो मुमुक्षुरतिदुर्लभ इत्यर्थः' । अतएव अधिकांशतः अद्वैतवेदान्तानधिकारीणामेवोपस्थितिः दर्शनात् समाजे अद्वैतवेदान्तस्य सर्वथा अनुपयोगित्वं सिध्यतीति चेत्, न । अद्वैतवेदान्तः सकलजीवानां कल्याणाय तेषां स्वस्वरूपबोधयितुं प्रवर्तते । यद्यपि अद्वैतवेदान्ताधिकारित्वमत्यन्तं दुरुहं विरलतया प्राप्यम् अतः विरल एव हि कश्चित पुरुषः साधनचतुष्टयसम्पन्नः तथापि सर्वानर्थभूतजन्ममरणरूपसंसारचक्रान् मुक्तये अद्वैतवेदान्तातिरिक्तः नान्यः मार्गः 'नान्यः पन्था विद्यते अयनाय' इति श्रुतेः । यद्यपि अद्वैतवेदान्तस्यधर्मार्थकामपुरुषार्थाः विषयाः न सन्ति । तथापि एतेषां त्रयाणां पुरुषार्थाणां मोक्षेण सह विरोधो नास्ति । एतेषां परस्पराविरोधत्वं ईशावास्योपनिषदि दृश्यते । यथा –

> ॐ ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
> तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥
> कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
> एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥

तत्र जगतः परमात्मरूपत्वं प्रतिपाद्य त्यागपूर्वकं भोगाय सर्वान् प्रवर्तयति न तु भोगान्निवर्तयति । एतेन मोक्षप्राप्त्यनन्तरमर्थात् ज्ञानप्राप्त्यनन्तरं त्यागपूर्वकं ज्ञानपूर्वकं वा धर्मार्थकामानां पुरुषार्थानां संसिद्धिः ध्वन्यते। ज्ञानपूर्वकं व्यवहारसम्पादनेन सामाजिकव्यवहारेषु उत्कृष्टत्वं परस्परद्वेषरहितत्वं भेदरहितत्वं, समानत्वं च समागच्छति। अशान्तिः, जात्यादिभेदभावना, वैमनस्यता, व्यवहारे कौटिल्यता हिंसात्वं चापगच्छति।

तत्र सर्वेषां पुरुषार्थानां परस्परापेक्षापि वर्तते । परस्परविरोधो नास्ति । यतो ह्यर्थाभावे धर्मकामयोः कल्पना क्लिष्टा, धर्माभावे अर्थकामयोरनिष्टापत्तिः, कामाभावे धर्मार्थयोः वैफल्यम्, मोक्षाभावे च संसाररूपी बन्धस्यापत्तिः त्रिषु पुरुषार्थेष्वनित्यत्वापत्तिश्च। तस्मादद्वैतवेदान्तः सर्वेषां पुरुषार्थानां प्राचीने अर्वाचीने वा समाजे ज्ञानपूर्वकं व्यवहारायोपदिशति । अतो अद्वैतवेदान्तस्य आधुनिके समाजे उपयोगित्वं सिद्ध्यति।

अद्वैतवेदान्तस्याधिकारित्वसम्पादनावसरे एव पुरुषः सकलज्ञानविज्ञानसम्पन्नतां निष्कलुषितान्तःकरणञ्च प्राप्नोति । वेदाद्यध्ययनेन ज्ञानविज्ञानसम्पन्नत्वं नित्यादिकर्मसम्पादनेन कर्मणि कौशलत्वं प्रायश्चित्तादिना सकलदोषरहितत्वम् एतैः सर्वैः शुद्धान्तःकरणत्वं साधनचतुष्ट्यसम्पन्नत्वं च प्राप्नोति । एतेषां सर्वेषां गुणानामाधुनिके समाजे नितान्तावश्यकता विद्यते । यतो हि अद्यतने समाजे वयं पश्यामश्चेत् ये सभ्यनागरिकाः, धनिकाः, उच्चकुलोत्पन्नाश्च तेषु प्रायशः सर्वे मिथ्यावादिनः चारित्रदोषयुक्ताः सन् व्यवहरन्ति । धर्ममोक्षहीनाः अर्थाय कामाय च चिन्तयन्ति सर्वदा । तेन समाजे अन्तःकरणाशुद्धिवशात् अल्पज्ञतासंस्कारश्च, कामाधिक्यात् व्यभिचारता, क्रोधवशात् भयातंकहत्यादेराधिक्यं लोभाधिक्यात् मिथ्याव्यवहारोत्कोचादेः ग्रहणमपहरणञ्च मोहवशात् मिथ्यावादः निरन्तरं वर्धते । एतेन अस्माकमुत्कृष्टा भारतीया संस्कृतिः पतनोन्मुखी भवति । संस्कृतेः रक्षणाय, वास्तविकसभ्यसमाजस्य निर्माणाय, भयमुक्तसमाजस्य निर्माणाय च अद्वैतवेदान्तस्य महदुपयोगः विद्यते।

अद्वैतवेदान्ते अधिकारीनिरूपणस्याशयः अयं नास्ति यत् अधिकारीत्वं सम्पाद्यैव मोक्षाय चेष्टते । अपितु अधिकारीसम्पादने तु नैरन्तर्यमपेक्षते । वेदाद्यध्ययनेन, काम्यनिषिद्धकर्मवर्जनेन, नित्यादिकर्मसम्पादनेन, प्रायश्चित्तोपासनादिना च निरन्तरं चित्तशुद्धिः करणीया । अतो तत्र वेदान्तसारे 'अस्मिञ्जन्मनिजन्मान्तरे वेति' पदेनाधिकारीत्वस्य नैरन्तर्यं प्रदर्शयति । तस्याशयः अस्ति यत् निरन्तरं स्वकीयमद्वैतवेदान्ताभिमतमोक्षाय योग्यताभिवर्धनम् । तत्र बृहदारण्यकोपनिषद्यपि याज्ञवल्क्येन मैत्रयीमुपदिष्टं यत्- 'श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति । एतेनापि ज्ञायते यत् प्रथमं वेदान्तवाक्यानां श्रवणं कर्तव्यम्, तदनन्तरं तेषां मननं करणीयम् अन्ते च निदिध्यासनम्। तस्मादाधुनिके समाजे अद्वैतवेदान्ताधिकारिणामल्पसंख्यात्वेऽपि पात्रतानुसारेण प्रथमं वेदान्तवाक्यानां श्रवणं करणीयम् । श्रवणेन तेषां ब्रह्मजिज्ञासां प्रति प्रवृत्तिः भविष्यति । अनन्तरं योग्यता सम्पाद्य विचारे कदाचित् प्रवृत्तिः स्यात् । किन्तु वेदान्तश्रवणेनैव तेषां भारतीयसंस्कृतिं प्रति दृष्टिः स्वस्था परिवर्तिता च भविष्यति । व्यवहारे कालुष्यस्यापहारः भविष्यति । ते कार्यक्षेत्रे परमार्थबुद्ध्या निष्पक्षचित्तेन च कार्याणि सम्पादयिष्यन्ति । एतेन स्वस्थसमाजस्य निर्माणं भविष्यति । तस्माद् अद्वैतवेदान्तस्य आधुनिके समाजेऽपि महति उपयोगिता वर्तते।

### तथ्यसूत्रः

1. ब्रह्मसूत्रः-शाङ्करभाष्यम्
2. उपनिषदः
3. श्रीमद्भगवद्गीता
4. वेदान्तदर्शनम्
5. श्रीमद्भगवद्गीता-शाङ्करभाष्यम्
6. उपनिषद्भाष्यम्

### ग्रन्थतालिका


1. विश्वनाथानन्दः, स्वामी, वेदान्तदर्शनम्, उद्बोधन-कार्यालयम्, 1996 ख्रीष्टाव्दः, वेलुडमठः।
2. शास्त्री, पण्डितः शिवनारायणः, गीता भाष्य नवाम्वरा, भारतीय पब्लिशिंग हाउस, 1673 ख्रीष्टाव्दः, वाराणसी।
3. गोयेन्दका, जयदयालः, श्रीमद्भगवद्गीता, गीताप्रेसः, गोरखपुरः, 2016 ख्रीष्टाव्दः।
4. सेमवालः, श्रीकृष्णः, शङ्करग्रन्थावलिः उपनिषद्भाष्यम्, दिल्ली संस्कृत अकादमी (दिल्ली सर्वकारः) 2006-2007 ख्रीष्टाव्दः।
5. सेमवालः, श्रीकृष्णः, ब्रह्मसूत्रभाष्यम्, दिल्ली संस्कृत अकादमी, (दिल्ली सर्वकारः) 2001-2010 ख्रीष्टाव्दः।
6. धर्मराजाध्वरीन्द्रः, वेदान्तपरिभाषा, सम्पादकः श्रीगजाननशास्त्रीमुसलगांवकर, वाराणसी, चौखाम्वा-विद्याभवनम्।

7. वल्लभाचार्यः, ब्रह्मसूत्र-अणुभाष्यम्, सम्मादकः मदनललशास्त्री, मुम्वाई, 1975 ख्रीष्टाव्दः ।
8. शास्त्री, अनन्तकृष्णः, ब्रह्मसूत्रशाङ्करभाष्यम्, राष्ट्रीयसंस्कृतसंस्थानम्, नवदिल्ली, 2012 ख्रीष्टाव्दः ।
9. एम्, डाँ. वसन्ता, अद्वैतवेदान्ते भामतीप्रस्थानस्य तुलनात्मकमध्ययनम्, नागपब्लिशर्स, नवदिल्ली, 2013.